॥ श्रीः ॥

चौखम्भा राजसेवा ग्रन्थमाला
४३

गोपालसहस्रनामस्तोत्रम्

(गोपालसहस्रनामस्तोत्रनामावलिसहितम्)

सम्पादक
याज्ञिकसम्राट् पण्डित वेणीरामशर्मा गौड



चौखम्भा ओरियन्टालिया
वाराणसी दिल्ली

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० बाक्स नं० १०३२

वाराणसी-२२१००१ (भारत)

फोन : ६३३५४ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर

(करोड़ीमल कालेज के पास)

दिल्ली-११०००७ फोन : २९११६१७

द्वितीय संस्करण १९८६

मूल्य रु० [illegible]·००

मुद्रक—श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी

नम्र निवेदन

संसार के समस्त पदार्थ क्षणभङ्गुर और नाशवान् होने के कारण अनित्य हैं, अतः उनमें ममता और आसक्ति का सर्वथा त्यागकर केवल एक सच्चिदानन्दघन वासुदेव परमात्मा ही परिपूर्ण परब्रह्म हैं, ऐसा दृढ़ निश्चय कर श्रद्धा-भक्तिपूर्वक मन, वाणी और शरीर से सब प्रकार भगवान् कृष्ण के शरण होकर नाम, गुण और प्रभाव-सहित उनके स्वरूप का निरन्तर चिन्तन और मनन करना चाहिए। ऐसा करने से शीघ्र ही मनुष्य मोक्ष को प्राप्त करता है।

भगवान् श्रीकृष्ण के वासुदेव, गोविन्द, गोपाल आदि अनन्त नाम हैं, जिन नामों के नामोच्चारणमात्र से ही मनुष्य भगवल्लाभ कर सकता है। भगवल्लाभ करानेवाले महत्त्वपूर्ण नाम 'गोपालसहस्रनामस्तोत्र' में वर्णित हैं, जिनका श्रद्धा और विश्वासपूर्वक प्रतिदिन पाठ करने से निश्चय ही मनुष्य भगवद्दर्शन और भगवल्लाभ करता है।

कलियुग में 'गोपालसहस्रनामस्तोत्र' के पाठ करने का विशेष महत्त्व लिखा है। इसके पाठ करने से मनुष्य धन, धान्य, पुत्र और दीर्घायु को प्राप्त करता है। अतः श्रद्धालु मनुष्यों को उचित है कि श्रद्धा-भक्तिपूर्वक अर्थज्ञान-पुरस्सर 'गोपालसहस्रनाम' का पाठ करें।

गोपालसहस्रनाम को 'सन्तानगोपाल' भी कहा जाता है। अतः गोपालसहस्रनाम (सन्तानगोपाल) के पाठ करने से दीर्घायु पुत्र की प्राप्ति होती है। जिसको पुत्र न हो, वह पुत्र की कामनार्थं भगवान् कृष्ण के मन्दिर में बैठकर दीपक जला ले और कमल, कदम्ब अथवा तुलसी की माला पर--

देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥


इस महामन्त्र का प्रतिदिन पाँच हजार अथवा अढ़ाई हजार अथवा एक हजार जप करे। इस प्रकार सवा लाख जप के पूर्ण हो जाने पर उसका दशांश हवन, तर्पण, मार्जन करके ब्राह्मणों को खीर, मालपूआ,

पूरी आदि उत्तम भोजन कराकर दक्षिणा दे। ऐसा करनें से भगवान् गोपाल कृष्ण की कृपा से अवश्य ही दीर्घायु पुत्र प्राप्त होता है।

हर्ष का विषय है कि चौखम्भा ओरियन्टालिया, वाराणसी के अध्यक्ष महोदय ने भगवान् गोपाल कृष्ण के भक्तों के कल्याणार्थं 'गोपालसहस्रनाम स्तोत्र-नामावली' प्रकाशित कर महान् उपकार किया है। एतदर्थं प्रकाशक महोदय धन्यवाद के विशेष पात्र हैं।

याज्ञिकसम्राट्
वेणीराम गौड वेदाचार्य

मार्गशीर्ष कृष्ण
भैरवाष्टमी
संवत् २०३७



नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य वीजाय ॥

श्रीगोपालसहस्रनामस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

अस्य श्रीगोपालसहस्रनामस्तोत्रमन्त्रस्य । श्रीनारद ऋषिः । अनुष्टुप् छन्दः । श्रीगोपालो देवता । कामो बीजम् । माया शक्तिः । चन्द्रः कीलकम् । श्रीकृष्णचन्द्रभक्तिरूपफलप्राप्तये श्रीगोपालसहस्रनामजपे विनियोगः । अथवा ॐ ऐं क्लीं बीजम् । ॐ श्री ह्रीं शक्तिः । श्रीवृन्दावननिवासः कीलकम् । श्रीराधा प्रियं परंब्रह्मेति मन्त्रः । धर्मादिचतुर्विधपुरुषार्थसिद्ध्यर्थे जपे

विनियोगः । ॐ क्लाँ अङ्गुष्ठाभ्यां नमः । ॐ क्लीं तर्जनीभ्यां नमः। ॐ क्लूँ मध्यमाभ्यां नमः । ॐ क्लैं अनामिकाभ्यां नमः । ॐ क्लौं कनिष्ठिकाभ्यां नमः । ॐ क्लः करतलकरपृष्ठाभ्यां नमः । ॐ क्लाँ हृदयाय नमः । ॐ क्लीं शिरसे स्वाहा । ॐ क्लूँ शिखायै वषट् । ॐ क्लैं कवचाय हुम् । ॐ क्लौं नेत्रत्रयाय वौषट् । ॐ क्लः अस्त्राय फट् ।

अथ ध्यानम्

कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं
नासाग्रे वरमौक्तिकं करतले वेणुं करे कङ्कणम् ।

सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावलि-
गोंपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥ १ ॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥ २ ॥

इति ध्यानम् ।

ॐ क्लीं देवः कामदेवः कामबीजशिरोमणिः ।
श्रीगोपालो महीपालः सर्ववेदान्तपारगः ॥ १ ॥
धरणीपालको धन्यः पुण्डरीकः सनातनः ।
गोपतिर्भूपतिः शास्ता प्रहर्ता विश्वतोमुखः ॥ २ ॥

आदिकर्ता महाकर्ता महाकालः प्रतापवान् ।
जगज्जीवो जगद्धाता जगद्भर्ता जगद्वसुः ॥ ३ ॥
मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान् ।
नारायणो हृषीकेशो गोविन्दो गरुडध्वजः ॥ ४ ॥
गोकुलेन्द्रो महाचन्द्रः शर्वरीप्रियकारकः ।
कमलामुखलोलाक्षः पुण्डरीक शुभावहः ॥ ५ ॥
दुर्वासाः कपिलो भौमः सिन्धुसागरसङ्गमः ।
गोविन्दो गोपतिर्गोत्रः कालिन्दीप्रेमपूरकः ॥ ६ ॥
गोपस्वामी गोकुलेन्द्रो गोवर्धनवरप्रदः ।

नन्दादिगोकुलत्राता दाता दारिद्र्यभञ्जनः ॥ ७ ॥

सर्वमङ्गलदाता च सर्वकामप्रदायकः ।
आदिकर्ता महीभर्ता सर्वसागरसिन्धुजः ॥ ८ ॥

गजगामी गजोद्धारी कामी कामकलानिधिः ।
कलङ्करहितश्चन्द्रो बिम्बास्यो बिम्बसत्तमः ॥ ९ ॥

मालाकारः कृपाकारः कोकिलास्वरभूषणः ।
रामो नीलाम्बरो देवो हली दुर्दममर्दनः ॥ १० ॥

सहस्राक्षपुरीभेत्ता महामारीविनाशनः ।
शिवः शिवतमो भेत्ता बलारात्तिप्रपूजकः ॥ ११ ॥

कुमारीवरदायी च वरेण्यो मीनकेतनः ।
नरो नारायणो धीरो राधापतिरुदारधीः ॥ १२ ॥

श्रीपतिः श्रीनिधिः श्रीमान् मापतिः प्रतिराजहा ।

वृन्दापतिः कुलग्रामी धामी ब्रह्मसनातनः ॥ १३ ॥
रेवतीरमणो रामश्चञ्चलश्चारुलोचनः ।
रामायणशरीरोऽयं रामी रामः श्रियःपतिः ॥ १४ ॥
शर्वरः शर्वरी शर्वः सर्वत्रशुभदायकः ।
राधाराधायितो राधी राधाचित्तप्रमोदकः ॥ १५ ॥
राधारतिसुखोपेतो राधामोहनतत्परः ।
राधावशीकरो राधाहृदयांभोजषट्पदः ॥ १६ ॥
राधालिङ्गनसंमोहो राधानर्तनकौतुकः ।
राधासञ्जातसम्प्रीती राधाकामफलप्रदः ॥ १७ ॥

वृन्दापतिः कोशनिधिर्लोकशोकविनाशकः ।

चन्द्रापतिश्चन्द्रपतिश्चण्डकोदण्डभञ्जनः ॥ १८ ॥
रामो दाशरथी रामो भृगुवंशसमुद्भवः ।
आत्मारामो जितक्रोधो मोहो मोहान्धभञ्जन ॥ १९ ॥
वृषभानुर्भवो भावः काश्यपिः करुणानिधिः ।
कोलाहलो हली हाली हेली हलधरप्रियः ॥ २० ॥
राधामुखाब्जमार्तण्डो भास्करो विरजो विधुः ।
विधिर्विधाता वरुणो वारुणो वारुणीप्रियः ॥ २१ ॥
रोहिणीहृदयानन्दी वसुदेवात्मजो वलिः ।
नीलाम्बरो रौहिणेयो जरासन्धवधोऽमलः ॥ २२ ॥
नागो नवाम्भोविरुदो वीरहा वरदो बली ।
गोपथो विजयी विद्वान् शिपिविष्टः सनातनः ॥ २३ ॥

पर्शुरामवचोग्राही वरग्राही शृगालहा ।
दमघोषोपदेष्टा च रथग्राही सुदर्शनः ॥ २४ ॥
वीरपत्नीयशस्त्राता जराव्याधिविघातकः ।
द्वारकावासतत्त्वज्ञो हुताशनवरप्रदः ॥ २५ ॥
यमुनावेगसंहारी नीलाम्बरधरः प्रभुः ।
विभुः शरासनो धन्वी गणेशो गणनायकः ॥ २६ ॥
लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः ।
वामनो वामनीभूतो वलिजिद्विक्रमत्रयः ॥ २७ ॥
यशोदानन्दनः कर्ता यमलार्जुनमुक्तिदः ।

उलूखली महामानी दामबद्धाह्वयी शमी ॥ २८ ॥

भक्तानुकारी भगवान् केशवोऽचलधारकः ।
केशिहा मधुहा मोही वृषासुरविघातकः ॥ २९ ॥
अघासुरविनाशी च पूतनामोक्षदायकः ।
कुब्जाविनोदी भगवान् कंसमृत्युर्महामखी ॥ ३० ॥
अश्वमेधो वाजपेयो गोमेधो नरमेधवान् ।
कन्दर्पकोटिलावण्यश्चन्द्रकोटिसुशीतलः ॥ ३१ ॥
रविकोटिप्रतीकाशो वायुकोटिमहाबलः ।
ब्रह्मा ब्रह्माण्डकर्ता च कमलावाञ्छितप्रदः ॥ ३२ ॥
कमली कमलाक्षश्च कमलामुखलोलुपः ।
कमलाव्रतधारी च कमलाभः पुरन्दरः ॥ ३३ ॥

सौभाग्याधिकचित्तोऽयं महामायी महोत्कटः ।

तारकारिः सुरत्राता मारीचक्षोभकारकः ॥ ३४ ॥
विश्वामित्रप्रियो दान्तो रामो राजीवलोचनः ।
लङ्काधिपकुलध्वंसी विभीषणवरप्रदः ॥ ३५ ॥
सीतानन्दकरो रामो वीरो वारिधिबन्धनः ।
खरदूषणसंहारी साकेतपुरवासनः ॥ ३६ ॥
चन्द्रावलीपतिः कूलः केसी कंसवधोऽमरः ।
माधवी मधुहा माध्वी माध्वीको माधवो मधुः ॥ ३७ ॥
मुञ्जाटवीगाहमानो धेनुकारिर्धरात्मजः ।
वंशी वटविहारी च गोवर्धनवनाश्रयः ॥ ३८ ॥
तथा तालवनोद्देशी भाण्डीरवनशंखहा ।

तृणावर्तकथाकारी वृषभानुसुतापतिः ॥ ३९ ॥
राधाप्राणसमो राधावदनाब्जमधुव्रतः ।
गोपीरञ्जनदैवज्ञो लीलाकमलपूजितः ॥ ४० ॥
क्रीडाकमलसन्दोहो गोपिकाप्रीतिरञ्जनः ।
रञ्जको रञ्जनो रङ्गो रङ्गी रङ्गमहीरुहः ॥ ४१ ॥
कामः कामारिभक्तोऽयं पुराणपुरुषः कविः ।
नारदो देवलो भीमो बालो बालमुखाम्बुजः ॥ ४२ ॥
अम्बुजो ब्रह्मसाक्षी च योगिदत्तवरो मुनिः ।
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ॥ ४३ ॥
पद्मनाभः सुरज्येष्ठो ब्रह्मा रुद्रोऽहिभूषितः ।

गणानां त्राणकर्ता च गणेशो ग्रहिलो ग्रही ॥ ४४ ॥

गणाश्रयो गणाध्यक्षः क्रोडीकृतजगत्त्रयः ।
यादवेन्द्र द्वारकेन्द्रो मथुरावल्लभो धुरी ॥ ४५ ॥
भ्रमरः कुन्तली कुन्तीसुतरक्षी महामखी ।
यमुनावरदाता च काश्यपस्य वरप्रदः ॥ ४६ ॥
शङ्खचूडवधोद्दामो गोपीरक्षणतत्परः ।
पाञ्चजन्यकरो रामी त्रिरामी वनजो जयः ॥ ४७ ॥
फाल्गुनः फाल्गुनसखो विराधवधकारकः ।
रुक्मिणीप्राणनाथश्च सत्यभामाप्रियङ्करः ॥ ४८ ॥
कल्पवृक्षो महावृक्षो दानवृक्षो महाफलः ।
अङ्कुशो भूसुरो भामो भामको भ्रामको हरिः ॥ ४९ ॥

सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः ।
प्रद्युम्नबलकर्ता च प्रहर्ता दैत्यहा प्रभुः ॥ ५० ॥
महाधनो महावीरो वनमालाविभूषणः ।
तुलसीदामशोभाढ्यो जालन्धरविनाशनः ॥ ५१ ॥
शरः सूर्यो मृकण्डश्च भास्करो विश्वपूजितः ।
रविस्तमोहा वह्निश्च वाडवो वाडवानलः ॥ ५२ ॥
दैत्यदर्पविनाशी च गरुडो गरुडाग्रजः ।
गोपीनाथो महीनाथो वृन्दानाथोऽवरोधकः ॥ ५३ ॥
प्रपञ्ची पञ्चरूपश्च लतागुल्मश्च गोपतिः ।
गङ्गा च यमुनारूपो गोदा वेत्रवती तथा ॥ ५४ ॥

कावेरी नर्मदा तापी गण्डकी सरयूस्तथा ।

राजसस्तामसः सत्त्वी सर्वाङ्गी सर्वलोचनः ॥ ५५ ॥
सुधामयोऽमृतमयो योगिनीवल्लभः शिवः ।
बुद्धो बुद्धिमतां श्रेष्ठो विष्णुर्जिष्णुः शचीपतिः ॥ ५६ ॥
वंशी वंशधरो लोको विलोको मोहनाशनः ।
रवरावो रवो रावो वालो बालबलाहकः ॥ ५७ ॥
शिवो रुद्रो नलो नीलो लाङ्गूली लाङ्गुलाश्रयः ।
पारदः पावनो हंसो हंसारूढो जगत्पतिः ॥ ५८ ॥
मोहिनीमोहनो मायी महामायो महामखी ।

वृषा वृषाकपिः कालः कालीदमनकारकः ॥ ५९ ॥
कुब्जभाग्यप्रदो वीरो रजकक्षयकारकः ।

कोमलो वारुणो राजा जलदो जलधारकः ॥ ६० ॥
हारकः सर्वपापघ्नः परमेष्ठी पितामहः ।
खड्गधारी कृपाकारी राधारमणसुन्दरः ॥ ६१ ॥
द्वादशारण्यसम्भोगी शेषनागफणालयः ।
कामश्यामः सुखः श्रीदः श्रीपतिः श्रीनिधिः कृति ॥६२॥
हरिर्हरो नरो नारो नरोत्तम इषुप्रियः ।
गोपालो चित्तहर्ता च कर्ता संसारतारकः ॥ ६३ ॥
आदिदेवो महादेवो गौरीगुरुरनाश्रयः ।
साधुर्मधुर्विधुर्धाता भ्राताऽक्रूरपरायणः ॥ ६४ ॥
रोलम्बी च हयग्रीवो वानरारिर्वनाश्रयः ।

वनं वनी वनाध्यक्षो महावन्द्यो महामुनिः ॥ ६५ ॥

स्यमन्तकमणिप्राज्ञो विज्ञो विघ्नविघातकः ।
गोवर्धनो वर्धनीयो वर्धनी वर्धनप्रियः ॥ ६६ ॥
वर्धन्यो वर्धनो वर्धी वार्धिन्यः सुमुखप्रियः ।
वर्धितो वृद्धको वृद्धो वृन्दारकजनप्रियः ॥ ६७ ॥
गोपालरमणीभर्ता साम्बकुष्ठविनाशनः ।
रुक्मिणीहरणः प्रेमप्रेमी चन्द्रावलीपतिः ॥ ६८ ॥
श्रीकर्ता विश्वभर्ता च नारायणनरो बली ।
गणो गणपतिश्चैव दत्तात्रेयो महामुनिः ॥ ६९ ॥
व्यासो नारायणो दिव्यो भव्यो भावुकधारकः ।

श्वःश्रेयसं शिवं भद्रं भावुकं भविकं शुभम् ॥ ७० ॥

शुभात्मकः शुभः शास्ता प्रशस्ता मेघनादहा ।
ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः ॥ ७१ ॥

कृष्णः कमलपत्राक्षः कृष्णः कमललोचनः ।
कृष्णः कामी सदा कृष्णः समस्तप्रियकारकः ॥ ७२ ॥

नन्दो नन्दी महानन्दी मादी मादनकः किली ।
मिली हिली गिली गोली गोलो गोलालयी गुली ॥ ७३ ॥

गुग्गुली मारकी शाखी वटः पिप्पलकः कृती ।
म्लेक्षहा कालहर्ता च यशोदायश एव च ॥ ७४ ॥

अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्दनः ।
हंसो नारायणो लीलो नीलो भक्तिपरायणः ॥ ७५ ॥

जानकीवल्लभो रामो विरामो विघ्ननाशनः ।

सहस्रांशुर्महाभानुर्वीरबाहुर्महोदधि ॥ ७६ ॥
समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
गोकुलानन्दकारी च प्रतिज्ञापरिपालकः ॥ ७७ ॥
सदारामः कृपारामो महारामो धनुर्धरः ।
पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः ॥ ७८ ॥
कम्बलाश्वतरो रामो रामायणप्रवर्तकः ।
द्योदिवौ दिवसो दिव्यो भव्यो भाविभयापहः ॥ ७९ ॥
पार्वतीभाग्यसहितो भ्राता लक्ष्मीविलासवान् ।
विलासी साहसी सर्वी गर्वी गर्वितलोचनः ॥ ८० ॥

मुरारिर्लोकधर्मज्ञो जीवनो जीवनान्तकः ।

यमो यमादिर्यमनो यामी यामविधायकः ॥ ८१ ॥
वसुली पांसुली पांसुपाण्डुरर्जुनवल्लभः ।
ललिताचन्द्रिकामाली माली मालाम्बुजाश्रयः ॥ ८२ ॥
अम्बुजाक्षो महायक्षो दक्षश्चिन्तामणिप्रभुः ।
मणिर्दिनमणिश्चैव केदारो वदरीश्रयः ॥ ८३ ॥
वदरीवनसम्प्रीतो व्यासः सत्यवतीसुतः ।
अमरारिनिहन्ता च सुधान्सिधुर्विधूदयः ॥ ८४ ॥
चन्द्रो रविः शिवः शूली चक्री चैव गदाधरः ।
श्रीकर्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥ ८५ ॥
श्रीपतिः पुण्डरीकाक्षः पद्मनाभो जगत्पतिः ।

वासुदेवोऽप्रमेयात्मा केशवो गरुडध्वजः ॥ ८६ ॥

नारायणः परं धाम देवदेवो महेश्वरः ।
चक्रपाणिः कलापूर्णो वेदवेद्यो दयानिधिः ॥ ८७ ॥
भगवान् सर्वभूतेशो गोपालः सर्वपालकः ।
अनन्तो निर्गुणोऽनन्तो निर्विकल्पो निरञ्जनः ॥ ८८ ॥
निराधारो निराकारो निराभासो निराश्रयः ।
पुरुषः प्रणवातीतो मुकुन्दः परमेश्वरः ॥ ८९ ॥
क्षणावनिः सार्वभौमो वैकुण्ठो भक्तवत्सलः ।
विष्णुर्दामोदरः कृष्णो माधवो मथुरापतिः ॥ ९० ॥
देवकीगर्भसम्भूतो यशोदावत्सलो हरिः ।

शिवः सङ्कर्षणः शम्भुर्भूतनाथो दिवस्पतिः ॥ ९१ ॥

अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः ।
निर्वाणनायको नित्योऽनिलजीमूतसन्निभः ॥ ९२ ॥
कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः ।
हृषीकेशः पीतवासा वसुदेवप्रियात्मजः ॥ ९३ ॥
नन्दगोपकुमारार्यो नवनीताशनः प्रभुः ।
पुराणपुरुषः श्रेष्ठः शङ्खपाणिः सुविक्रमः ॥ ९४ ॥
अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः ।
गदाधरः सुरार्तिघ्नो गोविन्दो नन्दकायुधः ॥ ९५ ॥
वृन्दावनचरः शौरिर्वेणुवाद्यविशारदः ।
तृणावर्तान्तको भीमसाहसो बहुविक्रमः ॥ ९६ ॥

सकटासुरसंहारी बकासुरविनाशनः ।

धेनुकासुरङ्घातः पूतनारिर्नृकेशरी ॥ ९७ ॥
पितामहो गुरुः साक्षी प्रत्यगात्मा सदाशिवः ।
अप्रमेयः प्रभुः प्राज्ञोऽप्रतर्क्यः स्वप्नवर्धनः ॥ ९८ ॥
धन्यो मान्यो भवो भावो धीरः शान्तो जगद्गुरुः ।
अन्तर्यामीश्वरो दिव्यो दैवज्ञो देवता गुरुः ॥ ९९ ॥
क्षीराब्धिशयनो धाता लक्ष्मीवाँल्लक्ष्मणाग्रजः ।
धात्रीपतिरमेयात्मा चन्द्रशेखरपूजितः ॥ १०० ॥
लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः ।
कोटिमन्मथसौन्दर्यो जगन्मोहनविग्रहः ॥ १०१ ॥

मन्दस्मिततमो गोपो गोपिका परिवेष्टितः ।

फुल्लारविन्दनयनश्चाणूरान्ध्रनिषूदनः ॥ १०२ ॥

इन्दीवरदलश्यामो बर्हिबर्हावतंसकः ।
मुरलीनिनदाह्लादो दिव्यमाल्यो वराश्रयः ॥ १०३ ॥

सुकपोलयुगः सुभ्रूयुगलः सुललाटकः ।
कम्बुग्रीवो विशालाक्षो लक्ष्मीवान् शुभलक्षणः ॥ १०४ ॥

पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः ।
कलङ्करहितः शुद्धो दुष्टशत्रुनिबर्हणः ॥ १०५ ॥

किरीटकुण्डलधरः कटकाङ्गदमण्डितः ।
मुद्रिकाभरणोपेतः कटिसूत्रविराजितः ॥ १०६ ॥

मञ्जीररञ्जितपदः सर्वाभरणभूषितः ।
विन्यस्तपादयुगलो दिव्यमङ्गलविग्रहः ॥ १०७ ॥

गोपिकानयनानन्दः पूर्णश्चन्द्रनिभाननः ।
समस्तजगदानन्दसुन्दरो लोकनन्दनः ॥ १०८ ॥
यमुनातीरसञ्चारी राधामन्मथवैभवः ।
गोपनारीप्रियो दान्तो गोपिवस्त्रापहारकः ॥ १०९ ॥
शृङ्गारमूर्तिः श्रीधामा तारको मूलकारणम् ।
सृष्टिसंरक्षणोपायः क्रूरासुरविभञ्जनः ॥ ११० ॥
नरकासुरहारी च मुरारिर्वैरिमर्दनः ।
आदितेयप्रियो दैत्यभीकरश्चेन्दुशेखरः ॥ १११ ॥
जरासन्धकुलध्वंसी कंसारातिः सुविक्रमः ।
पुण्यश्लोकः कीर्तनीयो यादवेन्द्रो जगन्नुतः ॥ ११२ ॥

रुक्मिणीरमणः सत्यभामाजाम्बवतीप्रियः ।
मित्रविन्दानाग्नजितीलक्ष्मणासमुपासितः ॥ ११३ ॥
सुधाकरकुले जातोऽनन्तप्रबलविक्रमः ।
सर्वसौभाग्यसम्पन्नो द्वारकायामुपस्थितः ॥ ११४ ॥
भद्रासूर्यसुतानाथो लीलामानुषविग्रहः ।
सहस्रषोडशस्त्रीशो भोगमोक्षैकदायकः ॥ ११५ ॥
वेदान्तवेद्यः संवेद्यो वैद्यब्रह्माण्डनायकः ।
गोवर्धनधरो नाथः सर्वजीवदयापरः ॥ ११६ ॥
मूर्तिमान् सर्वभूतात्मा आर्तत्राणपरायणः ।
सर्वज्ञः सर्वसुलभः सर्वशास्त्रविशारदः ॥ ११७ ॥

षड्गुणैश्वर्यसम्पन्नः पूर्णकामो धुरन्धरः ।

महानुभावः कैवल्यदायको लोकनायकः ॥ ११८ ॥
आदिमध्यान्तरहितः शुद्धसात्त्विकविग्रहः ।
आसमानसमस्तात्मा शरणागतवत्सलः ॥ ११९ ॥
उत्पत्तिस्थितिसंहारकारणं सर्वकारणम् ।
गम्भीरः सर्वभावज्ञः सच्चिदानन्दविग्रहः ॥ १२० ॥
विष्वक्सेनः सत्यसन्धः सत्यवान्सत्यविक्रमः ।
सत्यव्रतः सत्यसंज्ञः सर्वधर्मपरायणः ॥ १२१ ॥
आपन्नार्तिप्रशमनो द्रौपदीमानरक्षकः ।
कन्दर्पजनकः प्राज्ञो जगन्नाटकवैभवः ॥ १२२ ॥

भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः ।

दमघोषसुतद्वेषी बाणबाहुविखण्डनः ॥ १२३ ॥
भीष्मभक्तिप्रदो दिव्यः कौरवान्वयनाशनः ।
कौन्तेयप्रियबन्धुश्च पार्थस्यन्दनसारथिः ॥ १२४ ॥
नारसिंहो महावीरस्तम्भजातो महाबलः ।
प्रह्लादवरदः सत्यो देवपूज्यो भयंकरः ॥ १२५ ॥
उपेन्द्र इन्द्रावरजो वामनो बलिबन्धनः ।
गजेन्द्रवरदः स्वामी सर्वदेवनमस्कृतः ॥ १२६ ॥
शेषपर्यङ्कशयनो वैनतेयरथो जयी ।
अव्याहतबलैश्वर्यसम्पन्नः पूर्णमानसः ॥ १२७ ॥
योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः ।

योगिहृत्पङ्कजावासो योगमायासमन्वितः ॥ १२८ ॥

नादबिन्दुकलातीतश्चतुर्वर्गफलप्रदः ।
सुषुम्नामार्गसञ्चारी सन्देहस्यान्तरस्थितः ॥ १२९ ॥
देहेन्द्रियमनःप्राणसाक्षी चेतःप्रसादकः ।
सूक्ष्मः सर्वगतो देहीज्ञानदर्पणगोचरः ॥ १३० ॥
तत्त्वत्रयात्मकोऽव्यक्तः कुण्डलीसमुपाश्रितः ।
ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः ॥ १३१ ॥
श्रीनिवासः सदानन्दी विश्वमूर्तिर्महाप्रभुः ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ १३२ ॥
समस्तभुवनाधारः समस्तप्राणरक्षकः ।
समस्तसर्वभावज्ञो गोपिकाप्राणवल्लभः ॥ १३३ ॥

नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमङ्गलः ।
व्यूहार्चितो जगन्नाथः श्रीवैकुण्ठपुराधिपः ॥ १३४ ॥
पूर्णानन्दघनीभूतो गोपवेषधरो हरिः ।
कलापकुसुमश्यामः कोमलः शान्तविग्रहः ॥ १३५ ॥
गोपाङ्गनावृतोऽनन्तो वृन्दावनसमाश्रयः ।
वेणुवादरतः श्रेष्ठो देवानां हितकारकः ॥ १३६ ॥
बालक्रीडासमासक्तो नवनीतस्यं तस्करः ।
गोपालकामिनीजारश्चोरजारशिखामणिः ॥ १३७ ॥
परंज्योतिः पराकाशः परवासः परिस्फुटः ।
अष्टादशाक्षरो मन्त्रो व्यापको लोकपावनः ॥ १३८ ॥

सप्तकोटिमहामन्त्रशेखरो देवशेखरः ।

विज्ञानज्ञानसन्धानस्तेजोराशिर्जगत्पतिः ॥ १३९ ॥
भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः ।
भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः ॥ १४० ॥
भक्ताधीनमनाः पूज्यो भक्तलोकशिवङ्करः ।
भक्ताभीष्टप्रदः सर्वभक्ताघौघनिकृन्तनः ॥ १४१ ॥
अपारकरुणासिन्धुर्भगवान् भक्ततत्परः ॥ १४२ ॥
इति श्रीराधिकानाथसहस्रं नाम कीर्तितम् ।
स्मरणात्पापराशीनां खण्डनं मृत्युनाशनम् ॥ १४३ ॥
वैष्णवानां प्रियकरं महारोगनिवारणम् ।

ब्रह्महत्यासुरापानं परस्त्रीगमनं तथा ॥ १४४ ॥

परद्रव्यापहरणं परद्वेषसमन्वितम् ।
मानसं वाचिकं कायं यत्पापं पापसम्भवम् ॥ १४५ ॥
सहस्रनामपठनात्सर्वं नश्यति तत्क्षणात् ।
महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान् ॥ १४६ ॥
कार्तिक्यां सम्पठेद्रात्रौ शतमष्टोत्तरं क्रमात् ।
पीताम्बरधरो धीमान्सुगन्धिपुष्पचन्दनैः ॥ १४७ ॥
पुस्तकं पूजयित्वा तु नैवेद्यादिभिरेव च ।
राधाध्यानाङ्कितो धीरो वनमालाविभूषितः ॥ १४८ ॥
शतमष्टोत्तरं देवि पठेन्नामसहस्रकम् ।
चैत्रशुक्ले च कृष्णे च कुहूसङ्क्रान्तिवासरे ॥ १४९ ॥

पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत्क्षणात् ।

तुलसीमालया युक्तो वैष्णवो भक्तितत्परः ॥ १५० ॥
रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे ।
ब्राह्मणं पूजयित्वा च भोजयित्वा विधानतः ॥ १५१ ॥
पठेन्नामसहस्रं च ततः सिद्धिः प्रजायते ।
महानिशायां सततं वैष्णवो यः पठेत्सदा ॥ १५२ ॥
देशान्तरगता लक्ष्मीः समायाति न संशयः ।
त्रैलोक्ये च महादेवि सुन्दर्यः काममोहिताः ॥ १५३ ॥
मुग्धाः स्वयं समायान्ति वैष्णवं च भजन्ति ताः ।
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥ १५४ ॥

गुर्विणी जनयेत्पुत्रं कन्या विन्दति सत्पतिम् ।

राजानो वश्यतां यान्ति किं पुनः क्षुद्रमानवाः ॥ १५५ ॥
सहस्रनामश्रवणात्पठनात्पूजनात्प्रिये ।
धारणात्सर्वमाप्नोति वैष्णवो नात्र संशयः ॥ १५६ ॥
वंशीतटे, चान्यवटे तथा पिप्पलकेऽथवा ।
कदम्बपादपतले गोपालमूर्तिसन्निधौ ॥ १५७ ॥
यः पठेद्वैष्णवो नित्यं स याति हरिमन्दिरम् ।
कृष्णेनोक्तं राधिकायै मया प्रोक्तं पुरा शिवम् ॥ १५८ ॥
नारदाय मया प्रोक्तं नारदेन प्रकाशितम् ।
मया त्वयि वरारोहे प्रोक्तमेतत्सुदुर्लभम् ॥ १५९ ॥
गोपनीयं प्रयत्नेन न प्रकाश्यं कथञ्चन ।

शठाय पापिने चैव लम्पटाय विशेषतः ॥ १६० ॥


न दातव्यं न दातव्यं न दातव्यं कदाचन ।
देयं शिष्याय शान्ताय विष्णुभक्तिरताय च ॥ १६१ ॥
गोदानब्रह्मयज्ञादेर्वाजपेयशतस्य च ।
अश्वमेधसहस्रस्य फलं पाठे भवेद्ध्रुवम् ॥ १६२ ॥
मोहनं स्तम्भनं चैव मारणोच्चाटनादिकम् ।
यद्यद्वाञ्छति चित्तेन तत्तत्प्राप्नोति वैष्णवः ॥ १६३ ॥
एकादश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः ।
आहारं ब्राह्मणे दत्त्वा दक्षिणां स्वर्णभूषणम् ॥ १६४ ॥
तत आरम्भकर्त्ताऽसौ सर्वं प्राप्नोति मानवः ।
शतावृत्तं सहस्रं च यः पठेद्वैष्णवो जनः ॥ १६५ ॥

श्रीवृन्दावनचन्द्रस्य प्रासादात्सर्वमाप्नुयात् ।
यद्गृहे पुस्तकं देवि पूजितं चैव तिष्ठति ॥ १६६ ॥
न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित् ।
सर्पादिभूतयक्षाद्या नश्यन्ति नात्र संशयः ॥ १६७ ॥
श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ।
गृहे यत्र सहस्रं च नाम्नां तिष्ठति पूजितम् ॥ १६८ ॥

इति सम्मोहनतन्त्रे पार्वतीश्वरसंवादे श्रीगोपाल-
सहस्रनामस्तोत्रं सम्पूर्णम् ।



श्रीगोपालसहस्रनामावलिः



ॐ श्रीपोपालाय नमः
ॐ महीपालाय नमः
ॐ देद्वेदाङ्गपारगाय नमः
ॐ कृष्णाय नमः
ॐ कमलपत्राक्षाय नमः
ॐ पुण्डरीकाक्षाय नमः
ॐ सनातनाय नमः
ॐ गोपतये नमः
ॐ भूपतये नमः
ॐ शान्ताय नमः १०
ॐ ग्रहर्त्रे नमः
ॐ विश्वतोमुखाय नमः
ॐ आदिकर्त्रे नमः
ॐ महाकर्त्रे नमः
ॐ महाकालाय नमः
ॐ प्रतापवते नमः

ॐ जगज्जीवाय नमः
ॐ जगद्धात्रे नमः
ॐ जगद्भर्त्रे नमः
ॐ जगद्वसवे नमः २०
ॐ मत्स्याय नमः
ॐ भीमाय नमः
ॐ कुहूभर्त्रे नमः
ॐ हर्त्रे नमः
ॐ वाराहमूर्तये नमः
ॐ नारायणाय नमः
ॐ हृषीकेशाय नमः
ॐ गोविन्दाय नमः

ॐ गरुडध्वजाय नमः
ॐ गोकुलेशाय नमः ३०
ॐ महाचन्द्राय नमः
ॐ शर्वरीप्रियकारकाय नमः
ॐ कमलामुखलोलाक्षाय नमः
ॐ पुण्डरीकाय नमः
ॐ शुभावहाय नमः
ॐ दुर्वाससे नमः
ॐ कपिलाय नमः
ॐ भौमाय नमः
ॐ सिन्धुसागरसम्भवाय नमः
ॐ गोविन्दाय नमः ४०

ॐ गोपतये नमः
ॐ गोत्राय नमः
ॐ कालिन्दीप्रेमपूरकाय नमः
ॐ गोपस्वामिने नमः
ॐ गोकुलेन्द्राय नमः
ॐ गोवर्धनवरप्रदाय नमः
ॐ नन्दादिगोकूलत्रात्रे नमः
ॐ दात्रे नमः
ॐ दारिद्र्यभञ्जनाय नमः
ॐ सर्वमङ्गलदात्रे नमः ५०

ॐ सर्वकामवरप्रदाय नमः
ॐ आदिकर्त्रे नमः
ॐ महाभर्त्रे नमः
ॐ सर्वसागरसिन्धुजाय नमः
ॐ गजगामिने नमः
ॐ गजोद्धारिणे नमः
ॐ कामिने नमः
ॐ कामकलानिधये नमः
ॐ कलङ्करहिताय नमः
ॐ चन्द्रबिम्बास्याय नमः ६०

ॐ विश्वसत्तमाय नमः
ॐ मालाकारकृपाकाराय नमः
ॐ कोकिलस्वरभूषणाय नमः
ॐ रामाय नमः
ॐ नीलाम्बराय नमः
ॐ देवाय नमः
ॐ हलिने नमः
ॐ द्विविदमर्दनाय नमः
ॐ सहस्राक्षपुरीभेत्रे नमः
ॐ महामारीविनाशनाय नमः
ॐ शिवाय नमः
ॐ शिवतमाय नमः

ॐ भर्त्रे नमः
ॐ बलारातिप्रपूजकाय नमः
ॐ कुमारीवरदायिने नमः
ॐ वरेण्याय नमः
ॐ मीनकेतनाय नमः
ॐ नराय नमः
ॐ नारायणाय नमः
ॐ धीराय नमः ८०
ॐ धरापतये नमः
ॐ उदारधिये नमः
ॐ श्रीपतये नमः
ॐ श्रीनिधये नमः

ॐ श्रीमते नमः
ॐ मापतये नमः
ॐ प्रतिराजघ्नाय नमः
ॐ वृन्दापतये नमः
ॐ कुलाय नमः
ॐ ग्रामिणे नमः ९०
ॐ धाम्ने नमः
ॐ ब्रह्मणे नमः
ॐ सनातनाय नमः
ॐ रेवतीरमणाय नमः

ॐ रामाय नमः
ॐ प्रियाय नमः
ॐ चञ्चललोचनाय नमः
ॐ रामायणशरीराय नमः
ॐ रामोरामाय नमः
ॐ श्रियः पतये नमः १००
ॐ शर्वराय नमः
ॐ शर्वरीशर्वराय नमः
ॐ सर्वत्रशुभनामकाय नमः
ॐ राधायै नमः

ॐ राधयित्रे नमः
ॐ राधिने नमः
ॐ राधाचित्तप्रमोदकाय नमः
ॐ राधारतिसुखोपेताय नमः
ॐ राधामोहनतत्पराय नमः
ॐ राधावशीकराय नमः ११०
ॐ राधाहृदयाम्भोजषट्पदाय
ॐ राधालिङ्गनसम्मोदाय नमः
ॐ राधानर्तनकौतुकाय नमः
ॐ राधासञ्जातसम्प्रीताय नमः
ॐ राधाकामफलप्रदाय नमः
ॐ वृन्दापतये नमः

ॐ कोकनिधये नमः
ॐ कोकशोकविनाशनाय नमः
ॐ चन्द्रापतये नमः १२०
ॐ चन्द्रपतये नमः
ॐ चन्दकोदण्डभञ्जनाय नमः
ॐ रामाय नमः
ॐ दाशरथये नमः
ॐ रामापतये नमः
ॐ भृगुवंशसमुद्भवाय नमः
ॐ आत्मारामाय नमः
ॐ जितक्रोधाय नमः
ॐ मोहाय नमः

ॐ मोहान्धभञ्जनाय नमः
ॐ वृषभानुभवाय नमः १३०
ॐ भाविने नमः
ॐ काश्यपिने नमः
ॐ करुणानिधये नमः
ॐ कोलाहलाय नमः
ॐ हलाय नमः
ॐ हालिने नमः
ॐ हलिने नमः
ॐ हलधरप्रियाय नमः

ॐ राधामुखाब्जमार्तण्डाय नमः
ॐ भास्कराय नमः १४०
ॐ रविजाय नमः
ॐ विभवे नमः
ॐ विधये नमः
ॐ विधात्रे नमः
ॐ वरुणाय नमः
ॐ वारुणाय नमः
ॐ वारुणीप्रियाय नमः
ॐ रोहिणीहृदयानन्दिने नमः

ॐ वसुदेवात्मजाय नमः

ॐ बलिने नमः १५०

ॐ नीलाम्बराय नमः

ॐ रौहिणेयाय नमः

ॐ जरासन्धवधाय नमः

ॐ अमलाय नमः

ॐ नागोजवाम्भाय नमः

ॐ विरुदाय नमः

ॐ वीरघ्ने नमः

ॐ वरदाय नमः

ॐ बलिने नमः

ॐ गोपदाय नमः १६०

ॐ विजयिने नमः

ॐ विदुषे नमः

ॐ शिपिविष्टाय नमः

ॐ सनातनाय नमः

ॐ परशुरामवचोग्राहिणे नमः

ॐ सृगालघ्ने नमः

ॐ दमघोषोपदेष्ट्रे नमः

ॐ रथग्राहिणे नमः

ॐ सुदर्शनाय नमः

ॐ वीरपत्नीयशस्त्रात्रे नमः १७०

ॐ जराव्याधिविघातकाय नमः

ॐ द्वारकावासतत्त्वज्ञाय नमः

ॐ हुताशनवरप्रदाय नमः
ॐ यमुनावेगसंहारिणे नमः
ॐ नीलाम्बरधराय नमः
ॐ प्रभवे नमः
ॐ विभवे नमः
ॐ शरासनाय नमः
ॐ धन्विने नमः
ॐ गणेशाय नमः १८०
ॐ गणनायकाय नमः
ॐ लक्ष्मणाय नमः

ॐ लक्षणाय नमः
ॐ लक्ष्याय नमः
ॐ रक्षोवंशविनाशकाय नमः
ॐ वामनाय नमः
ॐ वामनीभूताय नमः
ॐ वमनाय नमः
ॐ वामनारुहाय नमः
ॐ यशोदानन्दनाय नमः १९०
ॐ कर्त्रे नमः
ॐ यमलार्जुनमुक्तिदाय नमः

ॐ उलूखलिने नमः
ॐ महामानाय नमः
ॐ दामबन्धाह्वयिने नमः
ॐ शमिने नमः
ॐ भक्तानुकारिणे नमः
ॐ भगवते नमः
ॐ केशवाय नमः
ॐ अचलधारकाय नमः २००
ॐ केशिघ्ने नमः
ॐ मधुघ्ने नमः
ॐ मोहिने नमः
ॐ वृषासुरविघातकाय नमः
ॐ मघासुरविघातिने नमः
ॐ पूतनामोक्षदायकाय नमः
ॐ कुब्जाविनोदिने नमः
ॐ भगवते नमः
ॐ कंसमृत्यवे नमः
ॐ महामखिने नमः २१०
ॐ अश्वमेधवाजपेयगोमेध-
नरमेधवते नमः
ॐ कन्दर्पकोटिलावण्याय नमः
ॐ चन्द्रकोटिसुशीतलाय नमः
ॐ रविकोटिप्रतीकाशाय नमः
ॐ वायुकोटिमहाबलाय नमः

ॐ ब्रह्मणे नमः
ॐ ब्रह्माण्डकर्त्रे नमः
ॐ कमलावाञ्छितप्रदाय नमः
ॐ कमलिने नमः
ॐ कमलाक्षाय नमः २२०
ॐ कमलामुखलोलुपाय नमः
ॐ कमलाव्रतधारिणे नमः
ॐ कमलाभाय नमः
ॐ पुरन्दराय नमः
ॐ सौभाग्याधिकचित्ताय नमः

ॐ महामायिने नमः
ॐ मदोत्कटाय नमः
ॐ ताटकारये नमः
ॐ सुरत्रात्रे नमः
ॐ मारीचक्षोभकारकाय नमः
ॐ विश्वामित्रप्रियाय नमः
ॐ दान्ताय नमः
ॐ रामाय नमः
ॐ राजीवलोचनाय नमः
ॐ लङ्काधिपकुलध्वंसिने नमः

ॐ विभीषणवरप्रदाय नमः
ॐ सीतानन्दकराय नमः
ॐ रामाय नमः
ॐ वीराय नमः
ॐ वार्धिबन्धनाय नमः २४०
ॐ खरदूषणसंहारिणे नमः
ॐ साकेतपुरवासाय नमः
ॐ चन्द्रावलिपतये नमः
ॐ कूलाय नमः
ॐ केशिकंसवधकराय नमः
ॐ माधवाय नमः
ॐ मधुघ्ने नमः

ॐ माध्विने नमः
ॐ माध्विकाय नमः
ॐ माधवीविभवे नमः २५०
ॐ मुञ्जाटवीगाहमानाय नमः
ॐ धेनुकारिणे नमः
ॐ दशात्मजाय नमः
ॐ वंशीवटविहारिणे नमः
ॐ गोवर्धनवनाश्रयाय नमः
ॐ तालवनोद्देशिने नमः
ॐ भाण्डीरवनशङ्कराय नमः
ॐ तृणावर्ताय नमः
ॐ कृपाकारिणे नमः

ॐ वृषभाय नमः २६०
ॐ सुधापतये नमः
ॐ राधाप्राणसमाय नमः
ॐ राधावदनाब्जमधूत्कटाय नमः
ॐ गोपीरञ्जनदैवज्ञाय नमः
ॐ लीलाकमलपूजिताय नमः
ॐ क्रीडाकमलसन्दोहाय नमः
ॐ गोपिकाप्रीतिरञ्जनाय नमः
ॐ रञ्जकाय नमः
ॐ रञ्जनाय नमः

ॐ रङ्गाय नमः २७०
ॐ रङ्गिणे नमः
ॐ रङ्गमहीरुहाय नमः
ॐ कामाय नमः
ॐ कामारिभक्ताय नमः
ॐ पुराणपुरुषाय नमः
ॐ कवये नमः
ॐ नारदाय नमः
ॐ देवलाय नमः
ॐ भीमाय नमः

ॐ बलाय नमः २८०
ॐ बालमुखाम्बुजाय नमः
ॐ अम्बुजाय नमः
ॐ ब्रह्मसाक्षिणे नमः
ॐ योगिने नमः
ॐ दत्तवराय नमः
ॐ मुनये नमः
ॐ ऋषभाय नमः
ॐ पर्वताय नमः
ॐ ग्रामाय नमः
ॐ नदीपवनवल्लभाय नमः २९०
ॐ पद्मनाभाय नमः
ॐ सुरज्येष्ठाय नमः
ॐ ब्रह्मणे नमः
ॐ रुद्राय नमः
ॐ अहिभूषिताय नमः
ॐ गणानां त्राणकर्त्रे नमः
ॐ गणेशाय नमः
ॐ ग्रहिलाय नमः
ॐ ग्रहिणे नमः
ॐ गणाश्रयाय नमः ३००
ॐ गणाध्यक्षाय नमः
ॐ क्रोडीकृतजगत्त्रयाय नमः
ॐ यादवेन्द्राय नमः

ॐ द्वारकेन्द्राय नमः
ॐ मधुरावल्लभाय नमः
ॐ धुरिणे नमः
ॐ भ्रमराय नमः
ॐ कुन्तलिने नमः
ॐ कुन्तीसुतरक्षिणे नमः
ॐ महामनसे नमः ३१०
ॐ यमुनावरदात्रे नमः
ॐ काश्यपस्य वरप्रदाय नमः
ॐ शङ्खचूडवधोद्दामाय नमः

ॐ गोपीरक्षणतत्पराय नमः
ॐ पाञ्चजन्यकराय नमः
ॐ रामिने नमः
ॐ त्रिरामिने नमः
ॐ वनजाय नमः
ॐ जयाय नमः
ॐ फाल्गुनाय नमः ३२०
ॐ फाल्गुनसखाय नमः
ॐ विराधवधकारकाय नमः
ॐ रुक्मिणीप्राणनाथाय नमः

ॐ सत्यभामाप्रियङ्कराय नमः
ॐ कल्पवृक्षाय नमः
ॐ महावृक्षाय नमः
ॐ दानवृक्षाय नमः
ॐ महाफलाय नमः
ॐ अङ्कुशाय नमः
ॐ भूसुराय नमः ३३०
ॐ भावाय नमः
ॐ भामकाय नमः
ॐ भ्रामकाय नमः
ॐ हरये नमः
ॐ सरलाय नमः
ॐ शाश्वताय नमः
ॐ वीराय नमः
ॐ यदुवंशशिवात्मकाय नमः
ॐ प्रद्युम्नाय नमः
ॐ बलकर्त्रे नमः ३४०
ॐ प्रहर्त्रे नमः
ॐ दैत्यघ्ने नमः
ॐ प्रभवे नमः
ॐ महाधनाय नमः
ॐ महावीराय नमः
ॐ वनमालाविभूषणाय नमः
ॐ तुलसीदामशोभाढ्याय नमः

ॐ जालन्धरविनाशनाय नमः
ॐ सूराय नमः
ॐ सूर्याय नमः
ॐ मृकण्डवे नमः
ॐ भास्वराय नमः
ॐ विश्वपूजिताय नमः
ॐ रवये नमः
ॐ तमोघ्ने नमः
ॐ वह्नये नमः
ॐ बाडवाय नमः
ॐ वडवानलाय नमः
ॐ दैत्यदर्पविनाशिने नमः
ॐ गरुडाय नमः ३६०
ॐ गरुडाग्रजाय नमः
ॐ गोपीनाथाय नमः
ॐ महीनाथाय नमः
ॐ वृन्दानाथाय नमः
ॐ अवरोधकाय नमः
ॐ प्रपञ्चिने नमः
ॐ पञ्चरूपाय नमः

ॐ लतायै नमः
ॐ गुल्माय नमः
ॐ गोमतये नमः ३७०
ॐ गङ्गायै नमः
ॐ यमुनारूपाय नमः
ॐ गोदायै नमः
ॐ वेत्रवत्यै नमः
ॐ कावेर्यै नमः
ॐ नर्मदायै नमः
ॐ तापिने नमः
ॐ गण्डकिने नमः
ॐ सरयुवे नमः

ॐ रजसे नमः ३८०
ॐ राजसाय नमः
ॐ तामसाय नमः
ॐ सत्वाय नमः
ॐ सर्वाङ्गिणे नमः
ॐ सर्वलोचनाय नमः
ॐ सुधामयाय नमः
ॐ अमृतमयाय नमः
ॐ योगिनां वल्लभाय नमः
ॐ शिवाय नमः
ॐ बुद्धाय नमः ३९०
ॐ बुद्धिमतां श्रेष्ठाय नमः

ॐ विष्णवे नमः
ॐ शचीपतये नमः
ॐ वंशिने नमः
ॐ वंशधराय नमः
ॐ लोकाय नमः
ॐ विलोकाय नमः
ॐ मोहनाशनाय नमः
ॐ रवरावाय नमः
ॐ रवाय नमः ४००
ॐ रावाय नमः

ॐ पलाय नमः
ॐ वालाय नमः
ॐ बलाहकाय नमः
ॐ शिवाय नमः
ॐ रुद्राय नमः
ॐ नलाय नमः
ॐ नीलाय नमः
ॐ लाङ्गलिने नमः
ॐ लाङ्गलाश्रयाय नमः ४१०
ॐ पारदाय नमः

ॐ पावनाय नमः
ॐ हंसाय नमः
ॐ हंसारूढाय नमः
ॐ जगत्पतये नमः
ॐ मोहिन्यै नमः
ॐ मोहनायै नमः
ॐ मायिने नमः
ॐ महासुखिने नमः ४२०
ॐ वृषाय नमः
ॐ वृषाकपये नमः
ॐ कालाय नमः
ॐ काल्यै नमः
ॐ दमनकारकाय नमः
ॐ कुब्जाभाग्यप्रदाय नमः
ॐ वीराय नमः
ॐ रजकाय नमः
ॐ क्षयकारकाय नमः
ॐ कोमलाय नमः ४३०
ॐ वारुण्यै नमः
ॐ राज्ञे नमः
ॐ जलजाय नमः
ॐ जलदारकाय नमः
ॐ हारकाय नमः
ॐ सर्वपापघ्नाय नमः

ॐ परमेष्ठिने नमः
ॐ पितामहाय नमः
ॐ खड्गधारिणे नमः
ॐ कृपाकारिणे नमः ४४०
ॐ राधारमणसुन्दराय नमः
ॐ द्वादशारण्यसम्भोगिने नमः
ॐ शेषाय नमः
ॐ नागफणालयाय नमः
ॐ कामाय नमः
ॐ श्यामाय नमः

ॐ सुखाय नमः
ॐ श्रीदाय नमः
ॐ श्रीपतये नमः
ॐ श्रीनिधये नमः ४५०
ॐ कृतिने नमः
ॐ हरये नमः
ॐ हराय नमः
ॐ नराय नमः
ॐ नाराय नमः
ॐ नरोत्तमाय नमः

ॐ इषुप्रियाय नमः
ॐ गोपालाय नमः
ॐ चित्तहर्त्रे नमः
ॐ कर्त्रे नमः ४६०
ॐ संसारतारकाय नमः
ॐ आदिदेवाय नमः
ॐ महादेवाय नमः
ॐ गौरीगुरवे नमः
ॐ अनाश्रयाय नमः
ॐ साधवे नमः
ॐ मधवे नमः
ॐ विधवे नमः

ॐ धात्रे नमः
ॐ त्रात्रे नमः ४७०
ॐ अक्रूरपरायणाय नमः
ॐ रोलम्बिने नमः
ॐ हयग्रीवाय नमः
ॐ वानरारये नमः
ॐ वनाश्रयाय नमः
ॐ वनाय नमः
ॐ वनिने नमः
ॐ वनाध्यक्षाय नमः
ॐ महावन्द्याय नमः
ॐ महामुनये नमः ४८०

ॐ स्यमन्तकमणिप्राज्ञाय नमः
ॐ विघ्नाय नमः
ॐ विघ्नविघातकाय नमः
ॐ गोवर्धनाय नमः
ॐ वर्धनीयाय नमः
ॐ वर्धिनीवर्धनप्रियाय नमः
ॐ वार्धन्याय नमः
ॐ वर्धिन्याय नमः
ॐ वर्धिष्णवे नमः
ॐ सुखप्रियाय नमः ४९०
ॐ वर्धिताय नमः
ॐ वर्धकाय नमः
ॐ वृद्धाय नमः
ॐ वृन्दारकजनप्रियाय नमः
ॐ गोपालरमणीभर्त्रे नमः
ॐ साम्वकुष्टविनाशनाय नमः
ॐ रुक्मिणीहरणाय नमः
ॐ प्रेम्णे नमः
ॐ प्रेमिणे नमः
ॐ चन्द्रावलीपतये नमः ५००

ॐ श्रीकर्त्रे नमः
ॐ विश्वभर्त्रे नमः
ॐ नारायणनराय नमः
ॐ बलिने नमः
ॐ गणाय नमः
ॐ गणपतये नमः
ॐ दत्तात्रेयाय नमः
ॐ महामुनये नमः
ॐ व्यासाय नमः
ॐ नारायणाय नमः ५१०
ॐ दिव्याय नमः
ॐ भव्याय नमः
ॐ भावुकधारकाय नमः
ॐ स्वश्रेयसे नमः
ॐ शिवाय नमः
ॐ भद्राय नमः
ॐ भावकाय नमः
ॐ भावुकाय नमः
ॐ शुभाय नमः
ॐ शुभात्मकाय नमः ५२०
ॐ सुभाय नमः
ॐ शास्त्रे नमः
ॐ प्रशस्ताय नमः
ॐ मेघनादघ्ने नमः

ॐ ब्रह्मण्यदेवाय नमः
ॐ दीनानामुद्धारकरणक्षमाय
ॐ कृष्णाय नमः
ॐ कमलपत्राक्षाय नमः
ॐ कृष्णाय नमः
ॐ कमललोचनाय नमः ५३०
ॐ कृष्णायकामिने नमः
ॐ सदाकृष्णाय नमः
ॐ समस्तप्रियकारकाय नमः
ॐ नन्दाय नमः
ॐ नन्दिने नमः
ॐ महानन्दिने नमः
ॐ मादये नमः
ॐ मादजनकाय नमः
ॐ किलये नमः
ॐ मीलिने नमः ५४०
ॐ हिलये नमः
ॐ गिलिने नमः
ॐ गोलिने नमः
ॐ गोलाय नमः

ॐ गोलालयाय नमः
ॐ गुलिने नमः
ॐ गुग्गुलिने नमः
ॐ मारकाय नमः
ॐ शाखिने नमः
ॐ वटाय नमः ५५०
ॐ पिप्पलकाय नमः
ॐ कृतिने नमः
ॐ म्लेच्छाय नमः
ॐ कालहर्त्रे नमः
ॐ यशोदायशसे नमः
ॐ अच्युताय नमः
ॐ केशवाय नमः
ॐ विष्णवे नमः
ॐ हरये नमः
ॐ सत्याय नमः ५६०
ॐ जनार्दनाय नमः
ॐ हंसाय नमः
ॐ नारायणाय नमः
ॐ नीलाय नमः
ॐ लीनाय नमः
ॐ भक्तिपरायणाय नमः
ॐ जानकीवल्लभाय नमः
ॐ रामाय नमः

ॐ विरामाय नमः
ॐ विषनाशनाय नमः ५७०
ॐ सिंहभानवे नमः
ॐ महाभानवे नमः
ॐ वीरभानवे नमः
ॐ महोदधये नमः
ॐ समुद्राय नमः
ॐ अब्धये नमः।
ॐ अकूपाराय नमः
ॐ पारावाराय नमः
ॐ सरित्पतये नमः
ॐ गोकुलानन्दकारिणे नमः
ॐ प्रतिज्ञापरिपालकाय नमः
ॐ सदारामाय नमः
ॐ कृपारामाय नमः
ॐ महारामाय नमः
ॐ धनुर्धराय नमः
ॐ पर्वताकाराय नमः
ॐ गयाय नमः
ॐ गेगाय नमः

ॐ द्विजप्रियाय नमः
ॐ कमलाश्वतराय नमः ५९०
ॐ रामाय नमः
ॐ रायायणप्रवर्तकाय नमः
ॐ द्योतिने नमः
ॐ दिवरूपाय नमः
ॐ दिवसाय नमः
ॐ दिव्याय नमः
ॐ भव्याय नमः
ॐ भागिने नमः
ॐ भयापघ्ने नमः
ॐ पार्वतीभाग्यसहिताय नमः

ॐ भर्त्रे नमः
ॐ लक्ष्मीसहायवते नमः
ॐ विलासिने नमः
ॐ साहसिने नमः
ॐ सर्विने नमः
ॐ गर्विने नमः
ॐ गर्वितलोचनाय नमः
ॐ सुरारये नमः
ॐ लोकधर्मज्ञाय नमः
ॐ जीवनाय नमः ६१०
ॐ जीवनान्तकाय नमः
ॐ यमाय नमः

ॐ यमारये नमः
ॐ यमनाय नमः
ॐ यमिने नमः
ॐ यमविघाताय नमः
ॐ वंशुलिने नमः
ॐ पांसवे नमः
ॐ पांशुलिने नमः
ॐ पाण्डवे नमः ६२०
ॐ अर्जुनवल्लभाय नमः
ॐ ललिताय नमः

ॐ चन्द्रिकामालायै नमः
ॐ मालिने नमः
ॐ मालाम्बुजाश्रयाय नमः
ॐ अम्बुजाक्षाय नमः
ॐ महायक्षाय नमः
ॐ दक्षाय नमः
ॐ चिन्तामणिप्रभवे नमः
ॐ मणये नमः ६३०
ॐ केदाराय नमः
ॐ बदरीश्रयाय नमः

ॐ बदरीवनसंप्रीताय नमः
ॐ व्यासाय नमः
ॐ सत्यवतीसुताय नमः
ॐ अमरारिनिहन्त्रे नमः
ॐ सुधासिन्धुविधूदयाय नमः
ॐ चन्द्राय नमः
ॐ रवये नमः
ॐ शिवाय नमः ६४०
ॐ शूलिने नमः
ॐ चक्रिणे नमः
ॐ गदाधराय नमः
ॐ श्रीकर्त्रे नमः
ॐ श्रीपतये नमः
ॐ श्रीदाय नमः
ॐ श्रीदेवाय नमः
ॐ देवकीसुताय नमः
ॐ श्रीपतये नमः
ॐ पुण्डरीकाक्षाय नमः ६५०
ॐ पद्मनाभाय नमः
ॐ जगत्पतये नमः
ॐ वासुदेवाय नमः
ॐ अप्रमेयाय नमः
ॐ आत्मने नमः
ॐ केशवाय नमः

ॐ गरुडध्वजाय नमः
ॐ नारायणाय नमः
ॐ परस्मै धाम्ने नमः
ॐ देवदेवाय नमः ६६०
ॐ महेश्वराय नमः
ॐ चक्रपाणये नमः
ॐ कलापूर्णाय नमः
ॐ वेद्यवेद्याय नमः
ॐ दयानिधये नमः
ॐ भगवते नमः
ॐ सर्वभूतेशाय नमः
ॐ गोपालाय नमः
ॐ सर्वपालकाय नमः
ॐ अनन्ताय नमः ६७०
ॐ निर्गुणाय नमः
ॐ नित्याय नमः
ॐ निर्विकल्पाय नमः
ॐ निरञ्जनाय नमः
ॐ निराधाराय नमः
ॐ निराकाराय नमः

ॐ निराभासाय नमः
ॐ निराश्रयाय नमः
ॐ पुरुषाय नमः
ॐ प्रणवातीताय नमः ६८०
ॐ मुकुन्दाय नमः
ॐ परमेश्वराय नमः
ॐ क्षणावनिने नमः
ॐ सार्वभौमाय नमः
ॐ वैकुण्ठाय नमः
ॐ भक्तवत्सलाय नमः
ॐ विष्णवे नमः
ॐ दामोदराय नमः

ॐ कृष्णाय नमः
ॐ माधवाय नमः ६९०
ॐ मधुरापतये नमः
ॐ देवकीगर्भसंभूताय नमः
ॐ यशोदावत्सलाय नमः
ॐ हरये नमः
ॐ भगवते भक्ततत्पराय नमः
ॐ संकर्षणाय नमः
ॐ शंभवे नमः
ॐ भूतनाथाय नमः
ॐ दिवस्पतये नमः
ॐ अव्ययाय नमः ७००

ॐ सर्वधर्मज्ञाय नमः
ॐ निर्मलाय नमः
ॐ निरुपद्रवाय नमः
ॐ निर्वाणनायकाय नमः
ॐ नित्याय नमः
ॐ नीलजीमूतसन्निभाय नमः
ॐ कलाध्यक्षाय नमः
ॐ सर्वज्ञाय नमः
ॐ कमलारूपतत्पराय नमः
ॐ हृषीकेशाय नमः ७१०
ॐ पीतवाससे नमः
ॐ वसुदेवप्रियात्मजाय नमः
ॐ नन्दगोपकुमाराय नमः
ॐ आर्याय नमः
ॐ नवनीताशनाय नमः
ॐ विभवे नमः
ॐ पुराणपुरुषाय नमः
ॐ श्रेष्ठाय नमः
ॐ शङ्खपाणये नमः
ॐ सुविक्रमाय नमः ७२०

ॐ अनिरुद्धाय नमः
ॐ चक्रधराय नमः
ॐ शार्ङ्गपाणये नमः
ॐ चतुर्भुजाय नमः
ॐ गदाधराय नमः
ॐ सुरार्तिघ्नाय नमः
ॐ गोविन्दाय नमः
ॐ नन्दकायुधाय नमः
ॐ वृन्दावनचराय नमः
ॐ शौरये नमः ७३०
ॐ वेणुवादनविशारदाय नमः
ॐ तृणावर्तान्तकाय नमः
ॐ भीमसाहसाय नमः
ॐ बहुविक्रमाय नमः
ॐ सकटासुरसंहारिणे नमः
ॐ बकासुरविनाशनाय नमः
ॐ धेनुकासुरसंहारिणे नमः
ॐ पूतनारये नमः
ॐ नृकेसरिणे नमः
ॐ पितामहाय नमः ७४०
ॐ गुरुवे नमः
ॐ साक्षिणे नमः
ॐ प्रतीचे नमः
ॐ आत्मने नमः

ॐ सदाशिवाय नमः
ॐ अप्रमेयाय नमः
ॐ प्रभवे नमः
ॐ प्राज्ञाय नमः
ॐ अतर्क्याय नमः
ॐ स्वर्धनाय नमः ७५०
ॐ धन्याय नमः
ॐ मान्याय नमः
ॐ भवाय नमः
ॐ भावाय नमः

ॐ धीराय नमः
ॐ शान्ताय नमः
ॐ जगद्गुरुवे नमः
ॐ अन्तर्यामिणे नमः
ॐ ईश्वराय नमः
ॐ दिव्याय नमः ७६०
ॐ दैवज्ञाय नमः
ॐ देवसंस्तुताय नमः
ॐ क्षीराब्धिशयनाय नमः
ॐ धात्रे नमः

ॐ लक्ष्मीपतये नमः
ॐ लक्ष्मणाग्रजाय नमः
ॐ धात्रीपतये नमः
ॐ अमेयात्मने नमः
ॐ चन्द्रशेखरपूजिताय नमः
ॐ लोकसाक्षिणे नमः ७७०
ॐ जगच्चक्षुषे नमः
ॐ पुण्यचारित्रकीर्तनाय नमः
ॐ कोटिमन्मथसौन्दर्याय नमः
ॐ जगन्मोहनविग्रहाय नमः
ॐ मन्दस्मिततनवे नमः
ॐ गोपाय नमः

ॐ गोपिकापरिवेष्टिताय नमः
ॐ फुल्लारविन्दनयनाय नमः
ॐ चाणूरान्ध्रनिषूदनाय नम
ॐ इन्दीवरदलश्यामाय नमः :
ॐ बर्हिबर्हावतंसकाय नमः
ॐ मुरलीनिनादाह्लादाय नमः
ॐ दिव्यमाल्याम्बरावृताय नमः
ॐ शुकपोलयुगाय नमः
ॐ सुभ्रूयुगलाय नमः
ॐ सुललाटकाय नमः
ॐ कम्बुग्रीवाय नमः
ॐ विशालाक्षाय नमः

ॐ लक्ष्मीपतये नमः
ॐ शुभलक्षणाय नमः ७९०
ॐ पीनवक्षसे नमः
ॐ चतुर्भुजाय नमः
ॐ चतुर्मूर्तये नमः
ॐ त्रिविक्रमाय नमः
ॐ कलंकरहिताय नमः
ॐ शुद्धाय नमः
ॐ दुष्टशत्रुनिबर्हणाय नमः
ॐ किरीटकुण्डलधराय नमः
ॐ कटकाङ्गदमण्डिताय नमः
ॐ मुद्रिकाभरणोपेताय नमः
ॐ कटिसूत्रविराजिताय नमः
ॐ मञ्जीररञ्जिताय नमः
ॐ सर्वाभरणभूषिताय नमः
ॐ विन्यस्तपादयुगलाय नमः
ॐ दिव्यमङ्गलविग्रहाय नमः
ॐ गोपिकानयनानन्दाय नमः
ॐ पूर्णचन्द्रनिभाननाय नमः
ॐ समस्तजगदानन्दाय नमः

ॐ सुन्दराय नमः
ॐ लोकनन्दनाय नमः ८१०
ॐ यमुनानीरसञ्चारिणे नमः
ॐ राधामन्मथवैभवाय नमः
ॐ गोपनारीप्रियाय नमः
ॐ दान्ताय नमः
ॐ गोपीवस्त्रापहारकाय नमः
ॐ शृङ्गारमूर्तये नमः
ॐ श्रीधाम्ने नमः
ॐ तारकाय नमः
ॐ मूलकारणाय नमः
ॐ सृष्टिसंरक्षणोपायाय नमः
ॐ क्रूरासुरविभञ्जनाय नमः

ॐ नरकासुरसंहारिणे नमः
ॐ मुरारये नमः
ॐ वैरिमर्दनाय नमः
ॐ आदितेयप्रियाय नमः
ॐ दैत्यभीकराय नमः
ॐ यदुशेखराय नमः
ॐ जरासंधकुलध्वंसिने नमः
ॐ कंसारातये नमः
ॐ सुविक्रमाय नमः ८३०
ॐ पुण्यश्लोकाय नमः
ॐ कीर्तनीयाय नमः
ॐ यादवेन्द्राय नमः
ॐ जगन्नुताय नमः

ॐ रुक्मिणीरमणाय नमः
ॐ सत्यभामाजाम्बवतीप्रियाय
ॐ मित्रविन्दानाग्नजितीलक्ष्मणा समुपासिताय नमः
ॐ सुधाकरकुलेजाताय नमः
ॐ अनन्ताय नमः
ॐ प्रबलविक्रमाय नमः ८४०
ॐ सर्वसौभाग्यसंपन्नाय नमः
ॐ द्वारकापट्टणस्थिताय नमः
ॐ भद्रासूर्यसुतानाथाय नमः
ॐ लीलामानुषविग्रहाय नमः
ॐ सहस्रषोडशस्त्रीशाय नमः

ॐ भोगमोक्षैकदायकाय नमः
ॐ वेदान्तवेद्याय नमः
ॐ संवेद्याय नमः
ॐ वैद्याय नमः
ॐ ब्रह्माण्डनायकाय नमः ८५०
ॐ गोवर्धनधराय नमः
ॐ नाथाय नमः
ॐ सर्वजीवदयापराय नमः
ॐ मूर्तिमते नमः
ॐ सर्वभूतात्मने नमः
ॐ आर्तत्राणपरायणाय नमः

ॐ सर्वसुलभाय नमः
ॐ सर्वशास्त्रविशारदाय नमः
ॐ षड्गुणैश्वर्यसंपन्नाय नमः ८६०
ॐ पूर्णकामाय नमः
ॐ धुरन्धराय नमः
ॐ महानुभावाय नमः
ॐ कैवल्यदायकाय नमः
ॐ लोकनायकाय नमः
ॐ आदिमध्यान्तरहिताय नमः
ॐ शुद्धाय नमः
ॐ सात्त्विकविग्रहाय नमः
ॐ असमानाय नमः
ॐ समत्वाय नमः ८७०

ॐ आत्मने नमः
ॐ शरणागतवत्सलाय नमः
ॐ उत्पत्तिस्थितिसंहारकारणाय
ॐ सर्वकारणाय नमः
ॐ गम्भीराय नमः
ॐ सर्वभावज्ञाय नमः
ॐ सच्चिदानन्दविग्रहाय नमः
ॐ विष्वक्सेनाय नमः
ॐ सत्यसन्धाय नमः
ॐ सत्यवाचे नमः ८८०
ॐ सत्यविक्रमाय नमः
ॐ सत्यव्रताय नमः
ॐ सत्यरताय नमः

ॐ सत्यधर्मपरायणाय नमः
ॐ आपन्नार्तिप्रशमनाय नमः
ॐ द्रौपदीमानरक्षकाय नमः
ॐ प्राज्ञाय नमः
ॐ जगन्नाटकवैभवाय नमः
ॐ भक्तवश्याय नमः
ॐ गुणातीताय नमः ८९०
ॐ सर्वैश्वर्यप्रदायकाय नमः
ॐ दमघोषसुतद्वेषिणे नमः
ॐ बाणबाहुविखण्डनाय नमः
ॐ भीष्ममुक्तिप्रदाय नमः

ॐ दिव्याय नमः
ॐ कौरवान्वयनाशनाय नमः
ॐ कौन्तेयप्रियबन्धवे नमः
ॐ पार्थस्यन्दनसारथये नमः
ॐ नारसिंहाय नमः
ॐ महावीराय नमः ९००
ॐ स्तम्भजाताय नमः
ॐ महाबलाय नमः
ॐ प्रह्लादवरदाय नमः
ॐ सत्याय नमः
ॐ देवपूज्याय नमः

ॐ अभयङ्कराय नमः
ॐ उपेन्द्राय नमः
ॐ इन्द्रावरजाय नमः
ॐ वामनाय नमः
ॐ बलिबन्धनाय नमः ९१०
ॐ गजेन्द्रवरदाय नमः
ॐ स्वामिने नमः
ॐ सर्वदेवनमस्कृताय नमः
ॐ शेषपर्यङ्कशयनाय नमः
ॐ वैनतेयरथाय नमः
ॐ जयिने नमः
ॐ अव्याहतबलाय नमः
ॐ ऐश्वर्यसंपन्नाय नमः
ॐ पूर्णमानसाय नमः
ॐ योगीश्वराय नमः ९२०
ॐ ईश्वराय नमः
ॐ साक्षिणे नमः
ॐ क्षेत्रज्ञाय नमः
ॐ ज्ञानदायकाय नमः
ॐ योगिहृत्पङ्कजावासाय नमः
ॐ योगमायासमन्विताय नमः
ॐ नादबिन्दुकलातीताय नमः
ॐ चतुर्वर्गफलप्रदाय नमः
ॐ सुषुम्नामार्गसञ्चारिणे नमः
ॐ देहस्यान्तरसंस्थिताय नमः
ॐ देहेन्द्रियमनः प्राणसाक्षिणे

ॐ चेतःप्रसादकाय नमः
ॐ सूक्ष्माय नमः
ॐ सर्वगताय नमः
ॐ देहिने नमः
ॐ ज्ञानदर्पणगोचराय नमः
ॐ तत्त्वत्रयात्मकाय नमः
ॐ अव्यक्ताय नमः
ॐ कुण्डलीसमुपाश्रिताय नमः
ॐ ब्रह्मण्याय नमः ९४०
ॐ सर्वधर्मज्ञाय नमः
ॐ शान्ताय नमः

ॐ दान्ताय नमः
ॐ गतक्लमाय नमः
ॐ श्रीनिवासाय नमः
ॐ सदानन्दाय नमः
ॐ विश्वमूर्तये नमः
ॐ महाप्रभवे नमः
ॐ सहस्रशीर्षपुरुषाय नमः
ॐ सहस्राक्षाय नमः ९५०
ॐ सहस्रपदे नमः
ॐ समस्तभुवनाधाराय नमः
ॐ समस्तप्राणरक्षकाय नमः

ॐ समस्ताय नमः
ॐ सर्वभावज्ञाय नमः
ॐ गोपिकाप्राणवल्लभाय नमः
ॐ नित्योत्सवाय नमः
ॐ नित्यसौख्याय नमः
ॐ नित्यश्रियै नमः
ॐ नित्यमङ्गलाय नमः ९६०
ॐ व्यूहार्चिताय नमः
ॐ जगन्नाथाय नमः
ॐ श्रीवैकुण्ठपुराधिपाय नमः
ॐ पूर्णानन्दघनीभूताय नमः
ॐ गोपवेषधराय नमः
ॐ हरये नमः
ॐ कलापकुसुमश्यामाय नमः
ॐ कोमलाय नमः
ॐ शान्तविग्रहाय नमः
ॐ गोपाङ्गनावृताय नमः ९७०
ॐ अनन्ताय नमः
ॐ वृन्दावनसमाश्रयाय नमः
ॐ वेणुनादरताय नमः
ॐ श्रेष्ठाय नमः
ॐ देवानांहितकारकाय नमः
ॐ जलक्रीडासमासक्ताय नमः
ॐ नवनीततस्कराय नमः
ॐ गोपालकामिनीजाराय नमः
ॐ चोरजारशिखामणये नमः

ॐ परंज्योतिषे नमः ९८०
ॐ पराकाशाय नमः
ॐ परावासाय नमः
ॐ परिस्फुटाय नमः
ॐ अष्टादशाक्षरमन्त्राय नमः
ॐ व्यापकाय नमः
ॐ लोकपावनाय नमः
ॐ सप्तकोटिमहामन्त्रशेखराय
ॐ देवशेखराय नमः
ॐ विज्ञानज्ञानसिन्धवे नमः
ॐ तेजोराशये नमः ९९०

ॐ जगत्पतये नमः
ॐ भक्तलोकप्रसन्नात्मने नमः
ॐ भक्तमन्दारविग्रहाय नमः
ॐ भक्तारिद्र्यशमनाय नमः
ॐ भक्तानांप्रीतिदायकाय नमः
ॐ भक्ताधीनमनःपूज्याय नमः
ॐ भक्तलोकशिवशङ्कराय नमः
ॐ भक्ताभीष्टप्रदाय नमः
ॐ सर्वभक्ताघौघनिकृतंकाय नमः
ॐ अपारकरुणासिन्धवे नमः
१००० ❀